विद्या भवन बालिका विद्यापीठ लखीसराय

वर्ग नवम् विषय संस्कृत शिक्षक श्यामउदय सिंह

ता:- १८/०७/२०२० (एन.सी.ई.आर.टी.पर आधारित प्रश्न )

अधोलिखित गद्यांशं पठित्वा तदाधारितानां प्रश्नानां उत्तराणि संस्कृतभाषया लिखत-

तदा खिन्नो बालकः एते पक्षिणो मानुषेषु नोपगच्छन्ति। तदन्वेषयाम्यपरं मानुषोचितं विनोदयितारमिति परिक्रम्य पलायमानं कमपि श्वानमवलोकयत्। प्रीतो बालस्तमित्थं संबोधयामास -रे मानुषाणां मित्र ! किं पर्यटसि अस्मिन् निदाघदिवसे ? आश्रयस्वेद प्रच्छायशीतलं तरुमूलम्।अहमपि क्रीडासहायं त्वामेवानुरूपं पश्यामिति।कुक्कुरः प्रत्याह–

यो माम् पुत्रप्रीत्या पोषयति स्वामिनो गृहे तस्य।

रक्षानियोकरणान्न मया भ्रष्टव्यमीषदपि ।।

१.एकपदेन उत्तरत-

(i) बाल: कीदृश: आसीत् ?

(ii)बाल: क्रीडासहायं कं पश्यति?

२.पूर्णवाक्येन उत्तरत-

(i)कुक्कुरं पुत्रप्रीत्या क: पोषयति?

(ii) कुक्कुर: किम् अवदत् ?

३.भाषिककार्यम्-

(i)'रात्रौ' इति पदस्य विलोमपदं अत्र किम् अस्ति?

(ii)'उपगच्छन्ति' इति क्रियापदस्य कर्तृपदं किम् ?

(iii)'रे मानुषाणां मित्र!' एतत् पदं कस्मै प्रयुक्तम् ?

(iv)'अस्मिन् निदाघदिवसे' अत्र विशेष्यपदं किम् ?